"चिता चिन्ता द्वयोर्मध्ये चिन्ता नाम गरीयसी।
चिता दहति निर्जीवं चिन्ता हि जीवितन्तथा॥")
दर्शनसम्भोगयोः प्रकारभावना। इति रस-
मञ्जरी॥ (सा च व्यभिचारिभावविशेषः। यथा,
साहित्यदर्पणे। ३। १७०। [कृत्॥")
"ध्यानं चिन्ता हितानाप्तेः शून्यताश्वासताप-
चिन्तामणिः, पुं, (चिन्तायां सर्व्वकामप्रदो मणि-
रिव। शाकपार्थिवादिवत् समासः। यद्वा,
चिन्तया ध्यानधारणादिना मण्यते आहूयते
इति। मण+इण्।) ब्रह्मा। इति शब्दरत्ना-
वली॥ (चिन्ता एव मणिरिव यस्य। चिन्ता-
शीलत्वादेवास्य तथात्वम्।) बुद्धविशेषः। इति
त्रिकाण्डशेषः॥ मणिविशेषः। यथा, भट्टिः।
"सामर्थ्यसम्पादितवाञ्छितार्थ-
श्चिन्तामणिः स्यान्न कथं हनूमान्॥"
स्पर्शमणिः। तथा च।
"यथा चिन्तामणिं स्पृष्ट्वा लौहं काञ्चनतां भजेत्॥"
इति पाद्मोत्तरखण्डम्॥
(अश्वविशेषः। यथा, नकुलकृताश्वचिकित्-
सिते। ४। १६।
"कण्ठे यस्य महावर्त्त एकोऽश्वस्य प्रजायते।
चिन्तामणिः स विज्ञेयश्चिन्तितार्थविवृद्धिदः॥")
चिन्तावेश्म, [न्] क्ली, (चिन्ताया मन्त्रणादेर्वेश्म
गृहम्।) मन्त्रणागृहम्। तत्पर्य्यायः। दार्व्व-
टम् २। इति हारावली। २६॥
चिन्तिड़ी, स्त्री, (तिन्तिड़ी। पृषोदरादित्वात्
तस्य चत्वम्।) तिन्तिड़ी। इति हिरूपकोषः॥
इति कश्चित्॥
चिन्तितं, त्रि, (चिति+कर्म्मणि क्तः।) कृत-
चिन्तनम्। यथा,—
"यच्चिन्तितं तदिह दूरतरं प्रयाति
यच्चेतसा न गणितं तदिहाभ्युपैति।"
इत्युद्भटः॥
कर्त्तरि क्ते चिन्तायुक्तः। भावे क्ते चिन्ता॥
चिन्तितिः, स्त्री, (चिन्त+भावे क्तिच् इट् च।)
चिन्ता। इति शब्दरत्नावली॥
चिन्तिया, स्त्री, चिन्ता। इति त्रिकाण्डशेषः॥
चिनः, पुं, शस्यविशेषः। इति शब्दचन्द्रिका॥
चिना इति भाषा॥ (चीनशब्दे विशेषोऽस्य
ज्ञातव्यः॥)
चिपिटः, पुं, (चयतीति। चि+बाहुलकात्
पिटच् स च कित्।) भक्ष्यद्रव्यविशेषः। चिड़ा।
इति भाषा॥ तत्पर्य्यायः। पृथुकः २। इति
हेमचन्द्रः। ३। ६५॥ चिपिटकः ३। इत्यमरः॥
चिपुटः ४। इति भरतः॥ धान्यचमसः ५।
इति त्रिकाण्डशेषः॥ चिपीटकः ६। इति
शब्दरत्नावली॥ अस्य गुणाः। गुरुत्वम्।
स्निग्धत्वम्। बृंहणत्वम्। कफवर्द्धकत्वञ्च॥ क्षीर-
युक्तस्य तस्य गुणाः। बलकारित्वम्। वायुनाशि-
त्वम्। मलभेदकत्वञ्च। इति राजवल्लभः॥
बृंहणत्वम्। तृष्यत्वञ्च। तस्य लक्षणं यथा,
भावप्रकाशे पूर्व्वखण्डे द्वितीये भागे।
"शालयः सतुषा आर्द्रा भृष्टा अस्फुटितास्ततः।
कुट्टिताश्चिपिटाः प्रोक्तास्ते स्मृताः पृथुका अपि॥"
"शालेया यावनालाद्याश्चिपिटाः पुष्टिवर्द्धनाः॥"
इति राजनिर्घण्टः॥
तस्य भक्षणविधिनिषेधौ यथा,—
"द्विःस्विन्नमन्नं पृथुकं शुद्धं देशविशेषके।
नात्यन्तशस्तं विप्राणां भक्षणे च निवेदने॥
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम्॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम्॥
(नि नता नासिका विद्यतेऽस्य। "इनच्पिटच्-
चिकचि च।" ५। २। ३३। इति पिटच्
प्रकृतेश्चिरादेशश्च। नतनासिके त्रि। यथा,
विश्वकर्म्मप्रकाशे। १३। २।
"दिग्वक्त्रं चिपिटश्चैव यज्ञर्णं सुरजन्तथा।"
इत्यस्य फलमाह तत्रैव। ५म श्लोके।
"तुङ्गहीनञ्च चिपिटं यज्ञस्थानर्द्धदर्शनम्॥"
चिपिटाकारशृङ्खादौ च। यथा, काशीखण्डे।
३७। १४।
"वक्त्रो ह्रस्वश्च चिपिटः सुखसौभाग्यभञ्जकः॥"
"चिपिटः चिम्पिटकाकारः।" इति तट्टीका॥)
चिपिटकः, पुं, (चिपिट+स्वार्थे कन्।) चिपिटः।
इत्यमरः। २। ९। ४७॥ (स्त्रियां टाप्। नत-
नासिका॥)
चिपिटा, स्त्री, गुण्डासिनीतृणम्। इति राज-
निर्घण्टः॥ (चिपिटा चिपिटाकारा इति।
चिपिट+टाप्। चिपिटमूर्त्तिः। यथा, काशी-
खण्डे। ३७। १६। "चिपिटाभिर्भवेद्दासी॥")
चिपुटः, पुं, (चिपिट+पृषोदरादित्वात् साधुः।)
चिपिटकः। इति भरतधृतरुद्रकोषः॥
चिप्पः, पुं, (चिक्कति पीड़यति अङ्गुलिमिति। चिक
+अच्। निपातनात् ककारस्थाने पागमे साधुः।)
नखरोगविशेषः। आङ्गुलहाड़ा इति भाषा॥
तल्लक्षणं यथा,—
"नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम्।
करोति दाहपाकौ च तं व्याधिं चिप्पमादिशेत्॥"
अथ कुनखस्य लक्षणमाह।
"अभिघातात् प्रदुष्टो यो नखो रूक्षोऽसितः खरः।
भवेत्तं कुनखं विद्यात् कुलीनं वा विधानतः॥"
अथ तयोश्चिकित्सा।
"चिप्पं रुधिरमोक्षेण शोधनेनाप्युपाचरेत्।
गतोष्मानमथैनन्तु सेचयेदुष्णवारिणा।
शस्त्रेणापि यथायोग्यमुत्छिद्य स्रावयेत्ततः॥
व्रणोक्तेन विधानेन रोपयेत्तं विचक्षणः।
स्वरसेन हरिद्रायाः पात्रे कृत्वायसेऽभयाम्॥
घृष्ट्वा तज्जेन कल्केन लिम्पेच्चिप्पं पुनः पुनः।
काश्मर्य्याः सप्तभिः पत्रैः कोमलैः परिवेष्टितः॥
अङ्गुलीवेष्टकः पुंसां ध्रुवमाशु प्रशाम्यति।
शेषविद्रधिवत्तेन कुनखं समुपाचरेत्॥
नखकोटिप्रविष्टेन टङ्कणेन प्रशाम्यति।
कुनखश्चेत्तदा शीघ्रं सलिले प्लवतोऽपि च॥"
इति भावप्रकाशे मध्यखण्डे ४र्थे भागः॥
(लक्षणान्तरमस्य यथा,—
"कुर्य्यात् पित्तानिलं पाकं नखमांसे सरुग्ज्वरम्
चिप्पमक्षतरोगञ्च विद्यादुपनखञ्च तम्॥"
इति वाभटेनोत्तरस्थाने ३१ अध्याये उक्तम्॥
चिकित्सास्य यथा,—
"चिप्पं शुद्ध्या जितोष्माणं साधयेच्छस्त्रकर्म्मणा॥"
इत्युत्तरस्थाने द्वात्रिंशेऽध्याये वाभटेन चोक्तम्॥)
चिमिः, पुं, (चिनोति सञ्चिनोति मनुष्यजातिवद्-
वाक्यानीति। चि+बाहुलकात् मिक्।) शुक-
पक्षी। इति शब्दमाला॥
चिमिकः, पुं, (चिमि+स्वार्थे कन्।) शुकपक्षी।
इति शब्दरत्नावली॥
चिरं, अ, (चि+बाहुलकात् रक्।) दीर्घ-
कालः। तत्पर्य्यायः। चिराय २ चिररात्राय ३
चिरस्य ४। इत्यमरः॥ चिरेण ५ चिरात् ६
चिरे ७। इति भरतः॥ चिरतः ८। इति
शब्दरत्नावली॥ (यथा, मनुः। ४। ६०।
"नैकः प्रपद्येताध्वानं न चिरं पर्व्वते वसेत्॥)
चिरकारी, [न्] त्रि, (चिरं व्याप्य करोतीति।
कृ+णिनिः।) चिरक्रियः। (यथा, महाभारते।
१२। २६४। १।
"चिरकारी हि मेधावी नापराध्यति कर्म्मसु॥")
गौतमस्य पुत्रभेदः। अस्य निरुक्त्यादिकं यदुक्तं
महाभारते। १२। २६५। ४-५।
"चिरकारी महाप्राज्ञो गौतमस्याभवत् सुतः।
चिरेण सर्व्वकार्य्याणि विमृश्यार्थान् प्रपद्यते॥
चिरं सञ्चिन्तयन्नर्थांश्चिरं जाग्रत् चिरं स्वपन्।
चिरं कार्य्याभिपत्तिश्च चिरकारी तथोच्यते॥")
चिरकालः, पुं, (चिरः काल इति कर्म्मधारयः।)
दीर्घकालः। तत्पर्य्यायः। दीर्घरात्रम् २।
इति त्रिकाण्डशेषः॥
चिरक्रियः, त्रि, (चिरं व्याप्य क्रिया यस्य।)
चिरकालेन क्रियाकारकः। तत्पर्य्यायः। दीर्घ-
सूत्रः। इत्यमरः। ३। १। १७॥
चिरजीवकः, पुं, (चिरं जीवतीति। जीव+ण्वुल्।)
जीवकवृक्षः। इति जटाधरः॥
चिरजीवी, [न्] पुं, (चिरं जीवतीति। जीव+
णिनिः।) विष्णुः। काकः। इति मेदिनी॥
जीवकवृक्षः। शाल्मलिवृक्षः। इति राज-
निर्घण्टः॥ मार्कण्डेयः। अश्वत्थामा। बलिः।
व्यासः। हनूमान्। विभीषणः। कृपः। परशु-
रामः। इति तिथ्यादितत्त्वम्॥ बहुकालजीविनि
त्रि। इति जटाधरः॥ (यथा, रामायणे। २।
१। ३६।
"अथ राज्ञो बभूवैवं वृद्धस्य चिरजीविनः॥")
चिरञ्जीवी, [न्] पुं, (चिरं जीवतीति। जीव
+णिनिः।) विष्णुः। काकः। इति हेम-
चन्द्रः। ४। ३८८॥ जीवकवृक्षः। शाल्मलि-
वृक्षः। इति राजनिर्घण्टः॥ चिरजीविनि त्रि॥
चिरण्टी, स्त्री, (चिरात् चिरेण वा अटति
पितृगृहादिति। अट+अच्। "वयसि प्रथमे।"
४। १। २०। इति ङीप्। ततः पृषोदरात्
साधुः।) सुवासिनी। ऊढ़ा अनूढ़ा वा पितृ-